**COHERENCE** – The Multidisciplinary Research Journal
Volume No: 17, Issue No: 2, Year: 2026 (July-December)
PP: 41-48
ISSN: 0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

# व्याकरणशास्त्रे तिङन्तपदानां वैशिष्ट्यम्

डॉ. प्रकाश कुमार झा
ग्राम+पो.- शिवनगर, थाना- फुलपरास, जिला- मधुबनी

## सारांश

संस्कृतव्याकरणशास्त्रे पदद्वयं प्रमुखतया स्वीकृतम् अस्ति—सुबन्तपदम् तथा तिङन्तपदम्। तत्र तिङ्-प्रत्ययान्तानि पदानि तिङन्तपदानि इति कथ्यन्ते। एतानि धातूनां तिङ्-प्रत्यययोगेन निष्पन्नानि भवन्ति तथा क्रियायाः, कालस्य, पुरुषस्य, वचनस्य च बोधकानि सन्ति। पाणिनीयव्याकरणे तिङन्तपदानां महत्त्वं विशेषतया प्रतिपादितम् अस्ति, यतः वाक्यस्य प्रधानतत्त्वं क्रियापदम् एव भवति। क्रियाविना वाक्यस्य पूर्णार्थबोधः सामान्यतया न सम्भवति। तिङन्तपदानि धातुभ्यः लकारानुसारं विविधरूपाणि गृह्णन्ति। संस्कृतभाषायां लट्, लङ्, शलट्, लुट्, लृट्, लोट्, विधिलिङ्, आशिषलिङ्, लुङ्, लृङ् इत्यादयः दश लकाराः सन्ति, येषां माध्यमेन वर्तमान, भूत, भविष्यत्कालः, आज्ञा, सम्भावना, आशीर्वादः इत्यादयः भावाः ज्ञायन्ते। तिङन्तपदेषु पुरुषत्रयम् (प्रथम, मध्यम, उत्तम) तथा वचनत्रयम् (एकवचनम्, द्विवचनम्, बहुवचनम्) अपि प्रतिफलति। अतः तिङन्तपदानि भाषायाः व्याकरणिकां रचनायाः अत्यन्तं महत्त्वपूर्णानि अङ्गानि भवन्ति।

तिङन्तपदानां वैशिष्ट्यं यत् एतानि केवलं क्रियायाः बोधकानि न सन्ति, अपितु कर्तुः, कालस्य, वचनस्य, पुरुषस्य तथा भावस्य अपि ज्ञानं ददति। उदाहरणतया "गच्छति" इति पदं कस्यचित् एकवचनस्य प्रथमपुरुषस्य वर्तमानकाले गमनक्रियाम् अभिधत्ते। एतेन ज्ञायते यत् एकमेव तिङन्तपदं बहुविधव्याकरणिकसूचनां वहति। संस्कृतवाङ्मये वेदेषु, उपनिषत्सु, महाकाव्येषु, नाटकेषु तथा दार्शनिकग्रन्थेषु तिङन्तपदानां विपुलः प्रयोगः दृश्यते। वाक्यार्थनिर्णये, कारकसम्बन्धज्ञानाय, तथा भाषिकसौष्ठवस्य अभिव्यक्तये तिङन्तपदानां महत्वपूर्णा भूमिका वर्तते। अतः तिङन्तपदानि संस्कृतभाषायाः गतिशीलतायाः तथा अभिव्यक्तिसामर्थ्यस्य प्रमुखाधाररूपेण प्रतिष्ठितानि सन्ति।

## भूमिका

तिङ् अन्ते यस्य तत् तिङन्तम्। तिङ् पदेन तिङ् प्रत्याहारो गृह्यते, यस्य निर्माणं "तिप्तस्झि ....." इति सूत्रेण क्रियते। तिङ्प्रत्याहारान्तर्गतैः प्रत्ययैः निर्मिताः शब्दाः तिङन्ता उच्यन्ते। तत्र धातौ एक वचनेन तिङन्तोऽपि चोच्यते। "अपदं न प्रयुञ्जीत" इति भाष्यदिशा प्रयोगकरणाय पदनिर्माणमावश्यकम्, तत्र पाणिनीसूत्रदिशा द्विविधमेव। यथा- "सुप्तिङन्तं पदम्"(1) तत्र सुबन्तं तिङन्तं च पद संज्ञां भवति।

यद्यपि पदविभाजनविषये शास्त्रकारेषु मतवैभिन्यं दरीदृश्यते। यथा-यास्कः कथयति- "चत्वारि पदजातानि- नामाख्यातोपसर्गनिपाताश्च।"(2) केचिद्वैयाकरणाः अपि चत्वारि पदानि मन्यन्ते-

**"नामाख्यातोपसर्गनिपाताश्चेति वैयाकरणाः।"(3)**


© Copyright @ Authors

ISSN: 0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

महाभाष्यकारेण महाभाष्ये चत्वारि इति प्रतीकस्य व्याख्याने एवमुच्यते- "चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च।"[4] इतिहासकारदिशा त्रैविध्यं पद-त्वमपि युक्तिसहम्, तत्र "सुबन्तं तिङन्तमव्ययञ्च"[5] तेन नामशब्दास्यापि त्रिधा विभागः कृतः- "रूढो यौगिक: योगरूढश्च।" तद् दृष्टयाऽन्यो विभागोऽपि दृश्यते, यस्यानुमोदनं भाष्यकारेणापि कृतम्- "चतुष्टयी शब्दानां प्रवृत्तिः- जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छाशब्दाश्च।" केचिच्च कर्मप्रवचनीयानां शब्दानामपि पदत्त्वमामनन्ति। अन्ये विद्वांसः गतिसंज्ञकानां पृथक् सत्तां स्वीकृत्य पदस्य षड्विभागान् आमनन्ति।

वस्तुतः कर्मप्रवचनीयानां गतिसंज्ञकानाञ्च अन्तर्भावः निपातेषूपसर्गेषु च भवति। अतः पृथग् गणनाया आवश्यकता नास्ति। निरुक्तस्य दुर्गावृत्तौ लिखितमस्ति- "नापि षञ्च षडा। जातिकर्मप्रवचनीयभेदेनेति।"[6] पाणिनेः पदस्य द्वैविध्यत्वस्वीकारे युक्तिर्वाद्यते यत्तिङन्तातिरिक्ताः सर्वेऽपि शब्दाः सुबन्ताः सन्ति, यतो हि उपसर्गा-कर्मप्रवचनीयानां निपातेष्वन्तर्भावो भवति, निपातानाञ्चाव्ययेषु। एवञ्च स्वरादिनिपातानामव्ययसंज्ञा तेन भवति "स्वरादिनिपातमव्ययम्।"[7] तदनन्तरम् "अव्ययादाप्सुपः"[8] सूत्रेण सुपः लुग् भवति। परन्तु एतादृशाः शब्दाः सुबन्तकोटौ समायान्ति। अतो द्वैविध्यस्वीकारे न कापि क्षतिः परिलक्ष्यते।

"अर्थः पदमैन्द्राणामिति" दिशा ऐन्द्रादि कतिपयप्राचीनव्याकरणप्रवक्तारः कथयन्ति यत् सर्वे शब्दा अर्थवन्तः तेनैकविधं पदम्।[9] एवञ्चात्र बहुविधानि मताम्यवलोक्यन्ते। तेन भर्तृहरिणा प्रोक्तम्-

**द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधापि वा।**

**अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत्॥**[10]

पदविभागविषये यद् भिन्नताऽवलोक्यते तत्र समीक्षणं ममकृते अत्यावश्यकं नास्ति परन्तु तत्र विद्यते एव अतस्तिङन्तपदस्य स्वीकार्यता तत्रास्त्येव। तिङन्तपदस्य निर्माणं धातुभिः संयोगेन भवति। तत्र परमलघुमञ्जूषायां धात्वर्थनिरूपणप्रकरणस्यादौ नागेशः कथयति **"अथ सकलशब्द-मूलभूतत्वाद् धात्वर्थो निरूप्यते"**[11] तेन सकलशब्दमूलभूतत्वाद् धातोः निरूपणमावश्यकमिति विज्ञाय पूर्वं धातोर्युत्पत्तिः विधीयते- दधाति विविधं स्वरूपं यः स धातुः । सूत्रकारानुसारेण क्रियावाचिनो भूवादयो धातु संज्ञां लभन्ते- "भूवादयो धातवः"[12] सा तु क्रिया द्विधा भवति- साध्यावस्थापन्ना सिद्धावस्थापन्ना चेति । तत्र साध्यत्वम्- **"क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकं सत् कारकान्तरान्वय योग्यतावच्छेदकरूपवत्त्वम्"** यथा-भवति, पचति, खादतीत्यादयः। सिद्धत्वम्- **क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकवैजात्यवत्त्वे सति कारकत्वेन क्रियान्वयित्वे सति कारकान्तरान्वयायोग्यत्वम्।** यथा-पाकः, भावः, पाठ इत्यादयः।

अत्र साध्यावस्थापन्ना क्रियापूर्णक्रिया भवति, यत्र धातोस्तिङ्प्रत्ययाः "धातोः"[13] रधिकारे लकारस्थाने आयान्ति।

अन्या क्रिया सम्पूर्णं वाक्यं निर्मीयते। अत्रान्यस्याः क्रियाया अपेक्षा न तिष्ठति, परन्तु सिद्धावस्थापन्ना-क्रियायामन्य-तिङन्तपदस्यापेक्षा भवति, यतो हि तत्र निर्मिताः क्रियाः कृदन्ताः


© Copyright @ Authors

ISSN: 0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

विशेषणानि भवन्ति । एवञ्च सा क्रिया द्रव्यवद् भवति उक्तञ्च- "कृदभिहितो भावो द्रव्यवत् सम्प्रकाशते" अतो द्रव्यवत्त्वातत्र प्रथमादिविभक्तिषु रूपाणि प्रचलन्ति । तदनन्तरं तिङन्तपदसंयोगाद् वाक्यानि निर्मीयन्ते। यथा पाको भवति लेखो लिखतीत्यादयः तेन साध्यक्रियाद्वारैव वाक्यानि निर्मीयन्ते, अतोऽमरकोशस्य वाक्यमिदं चरितार्थं भवति **"तिङ् सुबन्तचयो वाक्यम्"**[14] एवञ्च लोकेऽर्थबोधकता अर्थसमाप्तिश्च वाक्येनैव भवति । यथोक्तं न्यायभाष्यकारेण "पदसमूहो वाक्यमर्थसमाप्तौ"[15] तेनैव कारणेन वाक्यस्फोटस्य मुख्यतया नागेशेन प्रदर्शिता "तत्र वाक्यस्फोटो मुख्यः"[16] कौण्डभट्टेनापि भूषणसारे स्फोटनिर्णये वाक्यस्फोटस्य मुख्यत्वं प्रतिपादितम्- **"वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीतिमतस्थितिः।"**[17] **"लः कर्मणि च भावे चाकर्मकेभ्यः"**[18] इति सूत्रद्वारा अकर्मकेभ्यो धातुभ्यो भावे कर्तरि च लकारा जायन्ते।

अयम्भावः वाच्यं त्रिविधं भवति कर्तृवाच्यं कर्मवाच्यं भाववाच्यञ्च। धातुरपि सकर्माकर्मकभेदेन द्विविधः। तत्र सकर्मका ये धातवः सन्ति तेभ्यः कर्तृवाच्ये कर्मवाच्ये च लकारा आयान्ति। यत्र तिङन्तेन उक्ताः कर्तारो भवन्ति तद्वाच्यं कर्तृवाच्यमुच्यते। तत्र कर्तुरनुसारेण त्रिषु पुरुषेषु क्रियाः तिङन्तपदानि च भवन्ति। कर्तुरुक्तत्वात् प्रथमा, कर्मणोऽनुक्तत्वात् द्वितीया तेन रामो ग्रामं गच्छति-इति वाक्यं सिद्ध्यति।

यत् तिङ्न्तपदेन कर्माणि उक्तानि भवन्ति तद्वाच्यं कर्मवाच्यमुच्यते। कर्मवाच्ये कर्मणः उक्तत्वात् तत्र प्रथमा तदनुसारेण आत्मनेपदे यक् प्रत्ययादिसंयोगेन क्रियाः तिङन्तपदानि त्रिषु पुरुषेषु संयोजितानि जायन्ते। कर्तुरनुक्तत्वात् "कर्तृकरणयोस्तृतीया"[19] इति अनभिहिते कर्तरि तृतीया भवति। यथा- रामेण ग्रामो गम्यते। अकर्मधातुपक्षे- अकर्मकधातुभ्यः कर्तरि = कर्तृवाच्ये वाक्यं निर्मितं भवति, यथा-रामः तिष्ठति। अत्र कर्तुरनुसारेण त्रिषु पुरुषेषु क्रियाः = तिङन्तपदानि भवन्ति।

अकर्मकधातुभ्यो भावे = भाववाच्ये वाक्यं निर्मीयते। तत्रापि भावकर्मणोः इति तिङ् विधाने भावलकारे तु आस्यते यया आस्यते त्वया इत्यादौ भाव एव तिङ् वाच्यः न तु युष्मदस्मदर्थौ, अतो न मध्यमउत्तमौ, तेनैव कारणेन कथितं सिद्धान्तकौमुद्याम् "युष्मदस्मद्भ्यां सामानाधिकरण्यात् प्रथमः पुरुषः''। तिङ्वाच्या या भावनाक्रिया सा असत्त्वरूपा लिङ्गसङ्ख्यान्वयायोग्यता। तस्यां तिङ्वाच्यभावनायां द्वित्वबहुत्वयोरप्रतीतिः। किन्त्वेकवचनमेव। तेन अनभिहितकर्तृपदात्, तृतीया विभक्तिः, तिङन्तपदं च प्रथमपुरुषैकवचने यक्-प्रत्ययादिसंयोगेन आत्मनेपदे विनिर्मीयते। अतस्त्वया मया अन्यैश्च भूयते इति सिद्ध्यति।

एतेन किं भवति? अर्थेषु विलक्षणता समायाति स तु चमत्कारस्तिङन्तपदानामेव भवति। एतादृशः चमत्कारो दशसु लकारेषु प्रतीयते। केचिदेतादृशा प्रत्यया अपि सन्ति येषां संयोगेन न केवलं विशिष्टानि तिङन्तपदानि निर्मीयन्ते, अपितु विशिष्टा अर्था अपि तेभ्यः पदेभ्यो निःसरन्ति। अत्रेदं ध्यातव्यम्- केचित् प्रत्ययाः विशिष्ट-धातुसंयोगेन स्वार्थेऽप्यागत्य तिङन्तपदनिर्माणे सहायका भवन्ति, परन्तु अधिकाधिकप्रत्ययानां संयोगेन विशिष्टा अप्यर्थाः निःसरन्ति ते प्रत्ययाः भवन्ति सनादयः। यथा-


© Copyright @ Authors

ISSN: 0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

संग्रहपदं विद्यते- **"सन्क्यच्काम्यच् क्यङ्यषोऽथाचारक्विप् णिज्यङौ तथा। यगाय् ईयङ् णिङ् चेति द्वादशानी सनादयः॥"**

पद्येऽस्मिन् प्रत्ययाः क्रमशः निरूप्यन्ते-तत्र प्रथमं सन्प्रत्यययुक्तं पदमायाति- पिपठिषति। अस्य विग्रहं वाक्यं भवति- पठितुमिच्छति। इति विग्रहे पठ्धातोः "धातोः कर्मणः समानकर्तृकादिच्छायां वा"[20] इति सूत्रद्वारा सन्प्रत्ययो भवति तदनन्तरं धातोर्विहितत्वादार्धधातुकत्वम्। इट्। द्वित्वम्। अभ्यास संज्ञायां हलादिशेषः "सन्यतः"[21] इत्यभ्यासस्येत्वे सन्-सकारस्य षत्वे पिपठिषेति दशायां "सनाद्यन्ता धातवः"[22] इति धातु संज्ञायां लट्लकारे पिपठिषतीति रूपं सिद्धं भवति।

अत्रेदं ध्येयम्- केवलं पठति-इति कथनेन अध्ययनक्रियाऽऽगच्छति, किन्तु पिपठिषतीति कथनेन अध्ययनक्रियया सह इच्छाथर्क्रियाया अपि समावेशो जायते, तेनात्र तिङन्तपदेन विशिष्टार्थो गम्यते। अनेन "धातूनामनेकार्थता" इत्युक्ति अपि सङ्गता भवति।

क्यच्प्रत्ययस्य निरूपणं नामधातुप्रकरणे विद्यते यत्र नामैव क्यच्प्रत्ययसंयोगेन धातुरूपे परिणतं भवति। सामान्यरूपेण धातुत्वात् तिङ्प्रत्ययो भवति, किन्तु क्यच्प्रत्ययसंयोगेन नाम्नो धातु संज्ञा भवति। यथा- आत्मनः पुत्रमिच्छतीति विग्रहे 'पुत्र अम्' शब्दात् "सुप आत्मनः क्यच्"[23] इति सूत्रेण क्यच् प्रत्ययेऽनुबन्धलोपे "सनाद्यन्ता धातवः"[24] इति धातु संज्ञायां "सुपो धातु प्रातिपदिकयोः"[25] इति सुपो लुकि "अकृत्सार्वधातुकयोर्दीर्घः"[26] इति अकारस्य दीर्घत्वे पुत्रीय दशायां पुनः धातु संज्ञायां लट्लकारे तिपि शपि च कृते पुत्रीयति सिद्ध्यति, यस्य विलक्षणोऽर्थो भवति- आत्मनः पुत्रमिच्छति।

काम्यच्प्रत्ययोऽपि-उक्तविषये भवति, तेन पुत्रमिवाचरतीति विग्रहे "उपमानादाचारे"[27] इति सूत्रेण पुत्रीयति छात्रमिति रूपं सिद्धं भवति। अत्रोपमानात् कर्मणः सुबन्तादाचारार्थे क्यच्प्रत्ययो भवति, परन्तु उपमानात्कर्तुः सुबन्तादाचारे क्यङ्प्रत्ययो विकल्पेन भवति, सान्तकर्तृवाचकस्य तु लोपोऽपि विकल्पेन जायते। तत्र सूत्रमस्ति- "कर्तुः क्यङ् सलोपश्च"[28] अत्रार्थद्वयं निःसरति-उपमानं यत्कर्तृकारकं तद्वृत्तेः सुबन्तात् क्यङ् प्रत्ययो भवति। यथा-कृष्ण इवाचरतीति विग्रहे कृष्णायते सिद्ध्यति।

चकारात् कर्तुः क्यङ् प्रत्ययः सान्तकर्तृवाचकस्य सकारस्य लोपोऽपि जायते। अत्रैव वार्तिकमायाति- **"ओजसोऽप्सरसो नित्यमितरेषां विभाषया"** अर्थात् उभयोः शब्दयोः सकारस्य नित्यं लोपो भवति, अन्यत्र तु विकल्पेन, तेन ओजस्वी इवाचरति ओजायते। अप्सरा इवाचरति अप्सरायते एकैकं रूपम्। यशस्वी इवाचरतीत्यत्र द्विविधं रूपं यशायते, यशस्यते इति।

अस्मिन्नेव प्रकरणे क्यष्-प्रत्ययोऽपि विद्यते यथा- "लोहितादिडाज्भ्यः क्यष्"[29] अर्थात् लोहितादिभ्यो डाजन्ताच्च भवत्यर्थे क्यष्प्रत्ययो भवति, अलोहितो लोहितो भवतीत्यर्थे लोहितायति, लोहितायते इति रूपद्वयं सिद्धयति।

आचारे क्विप्प्रत्ययोऽपि भवति, तत्रानेकानि वार्तिकानि सन्ति, किन्तु स्थालीपुलाकन्यायेन एकमेवोदाहरणं प्रदीयते, यथा- कृष्ण इवाचरति इति कृष्णति। अत्र क्विप् प्रत्ययस्य सर्वापहारलोपो


© Copyright @ Authors

भवति, किन्तु क्विप्प्रत्यय संयोगेन कृष्णस्यैव धातु संज्ञा तदनन्तरं लट्लकारे तिङ् प्रत्ययो भवति, तेन कृष्णति शब्दस्यार्थो भवति कृष्ण इव आचरति।

णिच्प्रत्यययुक्तं पदं विद्यते- भावयति, अत्र भवन्तं प्रेरयतीत्यर्थे "हेतुमति च"[30] इत्यनेन 'णिच्' प्रत्ययो भवति। अत्र प्रकृतसूत्रस्यार्थो वर्तते। प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोः (भूवादयो धातवः, "सनाद्यन्ता धातव" इति सूत्रद्वयविहितधातुकेभ्यः) णिच् प्रत्ययो भवति। तत्र प्रेषणं नाम अध्येषणं तद्यथोक्तं बालमनोरमायाम्- "भृत्यादेर्निकृष्टस्य प्रवर्त्तना प्रेषणम् आज्ञेत्यर्थः"[31] भवन्तं प्रेरयतीत्यत्र देवदत्तो भवति, यज्ञदत्तः प्रेरयति इत्यर्थे यज्ञदत्तो देवदत्तं भावयति। सः भवति त्वां प्रेरयति इत्यर्थे स त्वां भावयति। एवमेव सर्ववचनेषु सर्वकालेषु च प्रत्ययाः भवन्तीति ज्ञेयम्। अत्र प्रयोज्यकर्तुः "स्वतन्त्रः कर्ता"[32] इत्यनेन प्राप्तां कर्तृसंज्ञां निषिध्य "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ"[33] इत्यनेन कर्मसंज्ञायां "कर्मणि द्वितीया"[34] इति सूत्रेण द्वितीया क्रियते। तथा च एवं प्रकारे सर्वेषां धातूनां विग्रहे क्रमः ज्ञातव्य। अत्र प्रकृतार्थे 'भू' धातोः "हेतुमति च"[35] इत्यनेन आवादेशे सति भावय इति दशायां णिजन्तत्वात् धातुत्वेन लटि तिपि शपि अनुबन्धलोपे भावय अ ति इति स्थितौ गुणे अयादेशे च कृते सति भावयति इति सिद्धम्।

यङ् प्रत्यययुक्तं पदमस्ति बोभूयते अस्यार्थो भवति- पुनः पुनरतिशयेन वा भवति इति बोभूयते। अत्र "धातोरेकाचो हलादेः क्रियासमभिहारे यङ्"[36] इत्यनेन यङ् प्रत्ययो विधीयते। सूत्रस्यार्थो विद्यते- पौनःपुन्ये भृशार्थे च द्योत्ये धातोरेकाचो हलादेर्यङ् स्यात्। तस्य एवं सिद्धिः। पुनः पुनरतिशयेन वा भवतीतिविग्रहे "धातोरेकाचो हलादेः क्रियासमभिहारे यङ्"[37] इति सूत्रेण यङि अनुबन्धलोपे "सन्यङोः"[38] इत्यनेन द्वित्वेऽभ्याससंज्ञायाम् "अभ्यासे चर्च"[39] इति जश्त्वेन भकारस्य बकारे "गुणो यङ्लुकोः"[40] इत्यनेन अभ्यासस्य ऊकारस्य गुणे बोभूय इति दशायां "सनाद्यन्ता धातवः"[41] इति धातुसंज्ञायां लटि ङित्वादात्मनेपदे त प्रत्यये एत्वे शपि पररूपे च कृते सति बोभूयते इति सिद्धम्।

सामान्यरूपेण भाववाच्ये कर्मवाच्ये च यक् प्रत्ययो भवति "सार्वधातुके यक्"[42] इति सूत्रेण- यथा- आस्यते भवता। तत्पश्चात् आयादिप्रत्ययः स्वार्थे भवति "गुपूधूपविच्छिपणिपनिभ्य आयः"[43] इति सूत्रेण। सूत्रे पठितेभ्यः धातुभ्यः स्वार्थे आयप्रत्ययो भवति। यथा-गोपायति। पुनश्च "आयादय आर्धधातुके वा"[44] इत्यनेनार्धधातुकविवक्षायामायादय-प्रत्ययाः विधीयन्ते विकल्पेन। यथा- गोपायाञ्चकार पक्षे जुगोप।

ईयङ्- प्रत्यययुक्तं पदमस्ति ऋतीयते ऋतीयेते इत्यादि। अत्र "ऋतेरीयङ्" इति सूत्रेण ईयङ् प्रत्ययो विधीयते। कण्ड्वादिभ्यो धातुभ्योऽपि नित्यं 'यक्' प्रत्ययो भवति स्वार्थे "कण्ड्वादिभ्यः यक्"[45] इति सूत्रेण। तत्र रूपं भवति कण्डूयति, कण्डूयते। अत्र धातुपाठे कुत्रापि 'कण्डूञ्' धातुः नोपलभ्यते तथापि कण्ड्वादिगणपठितत्वात् 'कण्डूञ्' धातुमत्त्वात् "कण्ड्वादिभ्यः यक्"[46] इति सूत्रेण स्वार्थे यकि "सनाद्यन्ता धातवः"[47] इति धातुत्वाल्लटि ङित्वात् कर्त्रभिप्राये तङि शपि पररूपे टेरेत्वे च कृते सति कण्डूयते। परगामिक्रियाफले तिपि शपि पररूपे च कण्डूयति इति सिद्धम्।


© Copyright @ Authors

ISSN: 0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

एवं प्रकारेणैतेषां प्रत्ययानां संयोगेन निर्मितानि तिङन्तपदानि विशिष्टान् अर्थानवबोधयन्ति। एवञ्च वैशिष्ट्यमप्यादधति। एतेषां वर्णनन्तु विस्तृतमस्ति परन्तु विस्तारभयात् स्थालीपुलाकन्यायेनातिसंक्षेपेण तिङन्तपदानां वैशिष्ट्यं यथा मति प्रतिपादितम्।

## निष्कर्ष

उपर्युक्तविवेचनात् स्पष्टं भवति यत् तिङन्तपदानि संस्कृतव्याकरणशास्त्रे अत्यन्तमहत्त्वपूर्णं स्थानं धारयन्ति। धातुभ्यः तिङ्-प्रत्यययोगेन निष्पन्नानि एतानि पदानि क्रियाव्यापारस्य प्रतिपादकानि भवन्ति तथा वाक्यस्य प्राणतत्त्वरूपेण कार्यं कुर्वन्ति। तिङन्तपदानां माध्यमेन कालः, पुरुषः, वचनम्, भावः तथा क्रियास्वरूपं च सम्यक् ज्ञायते। तिङन्तपदानां वैशिष्ट्यं तेषां बहुविधार्थबोधकत्वे निहितम् अस्ति। एकेनैव तिङन्तपदेन क्रियायाः स्वरूपं, कर्तुः स्थितिः, कालविशेषः तथा वचनभेदः ज्ञायते। एतत् संस्कृतभाषायाः वैज्ञानिकतां तथा सङ्क्षिप्तअभिव्यक्तिसामर्थ्यं प्रकाशयति। पाणिनीयव्याकरणे तिङन्तप्रकरणं अत्यन्तं विस्तृतरूपेण निरूपितम् अस्ति, यतो हि धातु-प्रत्ययविधानस्य मुख्यप्रयोजनं क्रियारूपनिर्माणमेव अस्ति। संस्कृतसाहित्यस्य, वेदवाङ्मयस्य तथा शास्त्रग्रन्थानां सम्यगध्ययनाय तिङन्तपदानां ज्ञानम् अनिवार्यम् अस्ति।

अतः निःसंशयं वक्तुं शक्यते यत् तिङन्तपदानि संस्कृतभाषायाः अभिव्यक्तिशक्तेः मूलाधारः, व्याकरणशास्त्रस्य केन्द्रीयविषयः तथा वाक्यरचनायाः जीवनरेखा च सन्ति। तेषां सम्यगध्ययनं संस्कृतभाषायाः गाम्भीर्यं, वैज्ञानिकता तथा सौन्दर्यं ज्ञातुम् अत्यावश्यकम् अस्ति।

## सन्दर्भ-सूची

1. अष्टाध्यायी-1/4/14
2. निरुक्त-1/1
3. निरुक्त-1/1
4. महाभाष्य-अ॰-1, प॰-1, आ॰- 1
5. व्याकरण शास्त्र का इतिहास द्विविध भाग, पृ.- 09
6. निरुक्त दुर्गावृत्त-1/1, पृ.-10 आनन्द मिश्र, पूना
7. अष्टाध्यायी-1/1/37
8. अष्टाध्यायी-2/4/82
9. सं॰ व्या॰ का॰ इतिहास, भाग-2, पृ.-9
10. महा॰ हिन्दी टीका वस्पथा॰ चत्वारि प्रतीके
11. परम. ल॰ धात्वर्थनि॰ प्रकरणम्
12. अष्टाध्यायी-1/3/1
13. अष्टाध्यायी-3/1/91


© Copyright @ Authors

14. अमर. - 1/3/2

15. परम ल॰ म॰ शक्तिनिरूपण

16. परम ल॰ म॰ शक्तिनिरूपण, पृ.- 4

17. वै॰ भ॰ सा॰ स्फो॰ का॰- 61

18. अष्टाध्यायी-3/4/69

19. अष्टाध्यायी-2/3/18

20. अष्टाध्यायी-3/1/7

21. अष्टाध्यायी-7/4/79

22. अष्टाध्यायी-3/1/22

23. अष्टाध्यायी-3/1/8

24. अष्टाध्यायी-3/1/32

25. अष्टाध्यायी-2/4/71

26. अष्टाध्यायी-7/4/32

27. अष्टाध्यायी-3/1/10

28. अष्टाध्यायी-3/1/11

29. अष्टाध्यायी-3/1/13

30. अष्टाध्यायी-3/1/26

31. वैया॰ सि॰ कौ॰ बालमनोरमा-पृ.-02

32. अष्टाध्यायी-1/4/54

33. अष्टाध्यायी-1/4/52

34. अष्टाध्यायी-2/3/2

35. अष्टाध्यायी-3/1/26

36. अष्टाध्यायी-3/1/22

37. अष्टाध्यायी-3/1/22

38. अष्टाध्यायी-3/1/9

39. अष्टाध्यायी-8/4/54

40. अष्टाध्यायी-7/4/82

41. अष्टाध्यायी-3/1/32

42. अष्टाध्यायी-3/1/67


© Copyright @ Authors

43. अष्टाध्यायी-3/1/28

44. अष्टाध्यायी-3/1/31

45. अष्टाध्यायी-3/1/27

46. अष्टाध्यायी-3/1/27

47. अष्टाध्यायी-3/1/32


© Copyright @ Authors